This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय ग्रंथालय
हस्तलिखित संग्रह
दाखल क्र. M-2163 विषय _____
नांव (कामदेव माहात्म्य) रुद्राध्यायमाहात्म्य
~~लेखक~~ / लिपीकार ग्रंथक पायगोंडे MSS
पृष्ठ 9 काळ _____ पूर्ण / ~~अपूर्ण~~
Checked 2012
CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥अथरुद्रेनमकंविभागःकथ्यते॥सचचतुर्धा॥द्वाषष्ट्युत्तरशतात्मकएकः॥षो
ढाविभागपक्षोद्वितीयः॥सपादशतचतुष्टयात्मकस्तृतीयः॥एकाशीत्यधिकशतद्वयात्मकश्चतुर्थः॥
व्याहतिचतुष्टयपक्षेतुअशीत्यधिकशतद्वयंभवति॥तत्राद्येप्रमाणंतावत्यरि शिष्टवाक्येषोडशैसम
दशेत्यायेनमस्तइतिषोडशद्वापेअंधसइतिसदशासमदशोडशैसमदशैकश्चचस्त्रयस्त्रिंशाद्यजू७षो
कानत्रि७शादुत्तरशतमिति॥द्वितीयेसवैजानुजदघ्नप्रथम७स्वाहाकरोतीत्युपक्रम्यसवात्रयस्त्रीण्या
वस्वाहाकरोतिप्रथमेचानुवाकेषष्टीयामथाशीतांचयानिचोर्द्धानियजू७ष्यावतानेभ्योनमश्शीतयो
नेमवैनानेतत्प्रीणातीत्यादिश्रुतिः॥अनुवाकांतेस्वाहाकारोजानुमात्रंचांतेचनाभिमात्रप्राक्प्रसवरोहण्यो
मुखमात्रप्रतिलोमप्रसवरोहांजुहोतिप्रामाणिकनमोस्तुतिप्रतिमंत्रमितिशतरुद्रियहामप्रकरणस्यसूत्रंच ॥७॥
तृतीयेअथातःशतरुद्रियंजुहोत्युपक्रम्यषष्टिश्चहवैत्रीणिचशतान्येतद्वैशतरुद्रियमथत्रि७शदथपंच
त्रि७शादितिश्रुतिरत्र॥चतुर्थेसर्वानुक्रमणिकासूत्रंरौद्रोध्यायःपरमेष्ठिनऋषिर्देवानांवाप्रजापतेर्वयो
नुवाकःषोडशर्चंएकरुद्रदेवत्यइत्यादिभात्र्याद्येपक्षेषोडर्चंप्रथमानुवाकेनमस्तक्षत्याद्याःषोडशऋचःषोड

कामदेव भाष्यम्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मंत्राः॥ एवमेत्यानुवाकेद्वापेअंधसस्पतेइत्याद्याःसप्तदशऋचःसप्तदशमंत्राः॥ तत्रैवांत्यानिनमोस्तुरुद्रेभ्यो
यएतावतीतेत्रीणियजूंषित्रयोमंत्राः॥ मध्येस्थेषुसप्तषष्टिस्त्वनुवाकेषुषट्त्रिंशदधिकंशतंसर्वाणियजूंषितावंतो
मंत्राःतेसर्वेमिलित्वा१६२ भवंति॥ अत्रैवंयजुःस्वरूपं॥ नमस्कारादिनमस्कारांतमेकंयजुरितिशाक पूर्णिः
मस्काराद्येकंयंजुरितियास्कः॥ तेनात्रैवंव्यवस्था॥ हिरण्यबाहवइत्यादयःपंचचत्वारिंशत्संख्याकानमःश्व
इतिस्यंताउभयतोनमस्कारमंत्राः॥ ततोनमोभवायचेत्यादयोनमआनिर्हतेभ्यइत्यंताएकाशीतिसंख्याका
अन्यतस्तोनमस्कारमंत्राः॥ अत्रैतेसर्वेआदिनमस्काराः॥ धनुष्कृद्भ्यश्चेवोनमइत्येकोयंतनमस्कारः॥
इतिव्याहृतिचतुष्टयपक्षेव्याहृतिपंचेकपक्षेतुनमइषुकृद्भ्योधनुष्कृद्भ्यश्चवोनमइत्ययमुभयतोनमस्का
रएकएव॥ एतेसर्वेमिलिताःसंतएकषष्ट्युत्तरंशतंभवंतीतिगंगाधरः॥ षष्ट्युत्तरंशतमितितुकाशीदीक्षिताः॥
तेषांपूर्वोक्तपरिशिष्टसंख्याविरोधस्तस्मादयुक्तमेवैतत्॥ अथषोढाविभागपक्षे॥ नमस्तरुद्रमन्यवइ
त्यारभ्यनमोनिषंगिभ्योमर्केभ्यश्चवोनमःस्वाहेत्येकोमंत्राः॥ नमस्तक्षभ्यइत्यारभ्यसुधन्वनेचस्वाहेतिद्वितीयो
मंत्रः॥ नमस्तुरायचेत्यारभ्ययएतावतश्चेतनभसिस्वाहेतितृतीयः॥ ततोनमोस्तुरुद्रेभ्यइत्यादयस्तेषां

नि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

जंभेदधमःस्वाहेत्यंतास्त्रयोपिमंत्राः एथगेवएषंषट्मंत्राः॥अथसपादशतचतुष्टयात्मकमंत्रस्वरूपं॥
प्रथमेतावदनुवाकप्रथमाकंडिकात्रिपदागायत्री॥तानित्रीणियजू ऽषि॥ततश्चतेत्रयोमंत्राः अद्भ्योवोचदित्य
तआरभ्यतिस्रः पंचपदास्तानिपंचदश॥पूर्वैःसहाष्टादशभवंति॥मानोमहांतमितिद्वेषट्पदे॥तानिद्वादश॥पू ष
र्वैःसहत्रिंशद्भवंति॥अवशिष्टादशाकंडिकाश्चतुष्पदाः॥तानिचत्वारिंशत्॥पूर्वैःसहसप्ततिर्भवंति॥सप्तर्षट्स्वनु क्रम्वाना
वाकेषुद्वादशेतिचतुश्चत्वारिंशत्॥यजुषा॥ततोनमोस्तुरुद्रेभ्यइत्यंतासांतिस्रणांचतुर्दशाचतुर्दशायजू ऽषि॥तानि
द्विचत्वारिंशत्॥मीढुष्टमेसप्तमेपंच॥तानिसप्तचत्वारिंशत्॥अन्याःषोडशाकंडिकाश्चतुष्पदाः॥तानिचतुःषष्टिः
पूर्वैःसप्तचत्वारिंशत्तासहैकादशोत्तरशतं॥सर्वाण्येवंचत्वारिंशतानि पंचविंशतिश्चभवंतीतिदेवयाज्ञिक
तोयंविभागः॥अथचतुर्थी॥प्रथमानुवाकषोडशर्चःषोडशमंत्राः॥द्रापेअंधसइतिविंशतिकंडिकात्मक
अंसानुवाकेसप्तदशकंडिकाःसप्तदशमंत्राः॥ततोंसास्तिस्रःकंडिकास्त्रयोमंत्राः॥नमोहिरण्यबाहवइत्यादी
निधनुष्कृत्यश्ववोनमइत्यंतानिचत्वारिंशदधिकद्विशतानियजूंषितावंतोमंत्राः॥ततःपंचव्याहृतयःपंच
मंत्राः॥अथवाचत्वारः॥ततश्चसर्वेमिलितैकाशीत्यधिकमशीत्यधिकंवाशतद्वयमंत्राणांभवति॥अत्रै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मध्यमस्थेषुसप्तषट्स्वनुवाकेषुपञ्चहृदयंजुःस्वरूपं॥नमोहिरण्यबाहवेसेनान्यइत्येतावदेवैकंयजुः॥
दिशांचपतयेनमइत्येतावद्वितीयं॥एवमुत्तरापयपि॥ततश्चैकैकस्यांकंडिकायामष्टावेवायजूंषि भवंति॥तानि
दशासुदशासुकंडिकास्वशीतिरशीतिःसंपद्यंतेकंडिकात्रयंवर्जयित्वा॥नमःसंगवेइत्यस्यादशा॥तत्रनमोवृक्षे
भ्योहरिकेशेभ्यइत्येतावदेकंयजुः॥एवंनमस्तारायेत्येतदपिपृथगेव॥नमःशंभवायचेत्यत्रषट्॥नमःपर्ण
यचेत्यत्रव्याहृतिभ्यःपूर्वमष्टौ॥चतस्रःपंचैवव्याहृतयइत्येवंद्वादशैवयजूंषीतियजुःस्वरूपं॥अत्रप्रतिमंत्र त्रयोदशः
विभागहोमपक्षेकचिन्नमोवःकिरिकेभ्यइत्यादीनांचतुर्णांवाक्यानांदेवानांहृदयेभ्यइत्येतद्विशेषणं॥त
स्मात्तत्प्रधानंगुणावृत्तिरितिन्यायेनसर्वेषुव्याहृतिवाक्येषुविशेषणवाक्यस्यानुषंगमिच्छंति॥तदयु
क्तंयतोनमोवःकिरिकेभ्यइत्यादीनांपंचानांप्रत्येकंयजुष्ट्वंतस्मात्॥तदुक्तंसर्वानुक्रमणिकायांकात्यायने
नमध्येसर्वाणियजूंषीत्युपक्रम्यनमोवःकिरिकेभ्यइत्यग्निवायुसूर्यहृदयभूताःपंचव्याहृतयोबहुरू
पदेवत्याइति॥अत्रपंचग्रहणात्स्यूनंचत्वारियजूंषीतिप्रतीयते॥तथाचऋग्यजुषोर्विभागेपरिशिष्ट
कारः॥ षोडशीध्यायेनमस्तइतिषोडशद्वापेऽंधसस्पतइतिसप्तदशाषोडो ॥२॥ विभ

ण्वानांस्तदशेन्नेरचस्त्रयस्त्रिंशाद्यजू ँष्येकोनत्रिँशादुत्तरंशतमितिवदन्देवानाँहृदयम्यइत्यस्यपृथक्कृत्य
दृमाह।एवंचनमस्तारायेत्यतदपिभिन्नमेवयजुः॥अन्यथोक्तसंख्यापूरणंनभवति॥अतएवेदं
महार्णवकारैर्भिन्नमेवगणितंप्रतिमंत्रविभागपक्षे॥अपिचअस्यश्रौतैश्चतुर्भिर्यजुर्भिःसहपाठा
दिसमपिपंचमंयजुरेवभवतिनतस्यशेषःतथाचसाश्रुतिः॥अथैतानियजू ँषीत्यपक्रम्यनमोवःकि
किंभ्यइत्येतेहीदँसर्वंकुर्वंतिदेवानाँहृदयेभ्यइत्यग्निर्वायुरादित्यएतानिहतानिदेवाँहृदयानि
नमोविचिन्वत्केभ्यइत्येतेहीदँसर्वंविचिन्वंतिनमोविक्षिणत्केभ्यइत्येतेवैतंविक्षिणंति
मआनिर्हतेभ्यइत्येतेवैभ्योलोकेभ्योनिर्हताइति॥अत्रैवंयथाकायायनाचार्यैर्नियतसहपाठादिस्मि
न्सूत्रेचातुर्मास्यानांपूर्वंप्रमाणांतरेणानित्यमंगीकृत्यनित्यैरग्निहोत्रादिकर्मभिःसहपाठात्तदेवपुन
र्दृढीकृतं॥साचश्रुतिः॥तएतान्यज्ञक्रतूंस्तनिरेग्निहोत्रंदर्शपूर्णमासौचातुर्मास्यानिपशुबंधँ
सौम्यमध्वरमिति॥एवमंत्रापि॥अतएवसर्वानुक्रमणिकाकारेणपंचव्याहृदयइत्यनश्रुतिस्वाहो
कारस्यमपत्रयतास्वकल्पनयाचलार्यवयजू ँषिभवंतीतिभ्रमोनिरस्तः॥एवंचसतियत्देवया

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याज्ञिकैरुक्तं नमः शब्दाभावाच्चकारोपबंधाभावाच्च देवानामितिनैथक्यं यजुः चतुर्णांविशेषणमेवेदं तस्मात्पंचमस्ययजुषोत्राभावाच्च तत्स्नव्याहृतय इत्येवपाठइति॥तेदसत्॥उक्तप्रकारेण पंचमयजुषः सद्भावात्बहुषुपुस्तकेषुपंचेतिपाठदर्शनात्सर्वैर्दिकैस्तादृशपाठस्यप्रयोजनत्वाच्च॥नहिवेदवेदांगेषुस्वकल्पनाबलेनपाठस्यान्यथानयनमुचितं॥नचनमः शब्दश्चकारोपबंधोवायजुर्लक्षणं॥येनतदभावादेवंस्यात्॥लक्षणंतुपरिशिष्टकारेणास्मिन्नध्यायेएतावत्यस्तच्चएतावंतियजूंषीत्येतस्मिन्नर्थेभिन्नमेवोक्तं॥ऋगादेर्योयजुर्ज्ञेयमनादेरपिसंख्ययेतिअतएवयजूंष्येकोनत्रिंशदुत्तरंशतमित्यनयासंख्ययैवंज्ञायतेयद्देवानामितिभिन्नमेवयजुरिति॥किंच॥नमः शब्दश्चकारोपबंधश्चेत्यतन्मंत्रलिंगं॥अथैतानियजूंषीतिश्रुतिः॥सात्वलिंगापेक्षयाब्रवीति॥ततश्चपंचैवभवंति॥तेनपंचव्याहृतयइत्येवपाठः॥अतएवकाशीदीक्षितैरपिस्वपद्धतौपंचव्याहृतयइत्येवलिखितं॥नचैवंसतितेषांवाउभयतोनमस्काराअन्येन्यतरतोनमस्काराइतिश्रुतेषामुभयतोनमस्काराअन्येन्यतरतोनमस्काराअपरेइतिसूत्रेणचसाकंविरोधः॥द्विवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धस्यापिनमस्कारस्यभावात्॥नवात्रोभयतोनमःशब्दोवाऽन्यतरतः॥सत्यंपरंतुयदिचेदर्थंवि
धिःस्यात्॥अयंत्वनुवादएव॥सचयथाप्राप्तस्यैवअपिच॥तिस्रोश्रीतयोरुद्राणांतेषामुभयतोनम
स्काराइत्यादिनातावत्संख्याकानांरुद्राणांमेवनमस्कारसंबंधदर्शनादनुवादस्ययथार्थत्वलाभे
तावत्संख्यातोधिकानांव्याहृतीनामयमनुवादएवनभवतियेनतद्बलाच्चैस्त्रीव्याहृतयइत्येवस्की
र्त्यं॥किंच॥यद्यस्यविधायकत्वंस्वीक्रियेततर्हिकदापिसार्थक्यमस्यैनभवति॥पाठादेवतथाविधा
नोनमस्काराणांप्राप्तत्वाद्व्यर्थमेवविधानं॥अपिचमध्येसर्वाणियजूंषिहिरण्यबाहवइतित्रि
स्त्रोश्रीतयोरुद्राणामित्यत्र संख्यामंत्रविषयिणी॥तेनतावत्संख्याकाएतेमंत्राःसिद्धाः॥ततश्च
तेषामुभयतोनमस्काराअन्येऽन्यतरतोनमस्काराअपरेइत्यत्रतेशब्देनसर्वेमंत्राःपरामृश्यंते॥त
त्रपाठतस्तुकेचनमंत्राअन्यतरतोनमस्काराएवप्राप्ताः॥यथानमःशंभवायचेत्यादयः॥केचि
तुअनमस्काराएव॥यथानमोभवायचेत्यादयः॥ततश्चान्यतरतोनमस्कारेषुयस्यशब्दस्यानु
वाकत्वंतस्यैवानमस्कारेषुविधायकत्वादेकप्रसरताभंगइत्ययुक्ततमं॥सचान्याय्यः॥अपि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषामियनेनवाक्येनपूर्वोक्तसंख्याविशिष्टानामेवरुद्राणांनमस्कारसंबंधोविनाद्याहती
नाविधानेप्रमाणमेवनास्ति॥किंच॥तथासतियजुषामुक्तसंख्यातोतिबाहुल्यान्मंत्रवदभिमतो
द्वाषष्ट्युत्तरशतविभागपक्षः॥संभवंति॥इदंतुअन्यत्सङ्गांतरमेवजातं॥परिशिष्टोक्तसंख्याविरोध
श्चतस्मादनुवादकत्वमेवस्वीकर्त्तव्यं॥तत्तुपूर्वमुक्तमेवसचयथाप्राप्तस्यैवभवतीति॥प्राप्तिस्तुश्रु
त्यनुसारेणयथाभवतितथास्वीकार्या॥नलिंगानुरोधेन॥तस्यदुर्बलत्वादित्युक्तमेव॥पुनरपिदेवया
ज्ञिकैरत्रैवमुक्तंयत्सर्वेष्वपिश्रुतिवाक्येषुकिरिकादिभिर्यौगिकैःशब्दैःसर्वत्राग्निवायुसूर्याएवा
भिधीयंतेइति॥ततश्चसर्वत्रतएवविशेष्यभूताः॥सर्वाण्यपिवाक्यानितेषामेवविशेषणानिप्रति
पादयंति॥चक्रपाणिर्गदाधरइत्यादिवत्॥ततश्चयथादैनामितिविशेषणंतथाकिरिकेभ्यइत्यादीन्य
पिचत्वारिविशेषणान्येव॥एवंचसतिपंचानांवाक्यानांतुल्यत्वात्सर्वाण्यपिभिन्नान्यवयज्ञूंषी
नपरस्परंविशेष्यविशेषणभावइतिसिद्धं॥ततश्चतदीयंत्वेरवंनतेषामेवविरुद्धं भवति॥यद्वा
भवतुविशेषणमिदं॥तथाप्यनुषंगोनभवत्येतस्योत्तरस्मिन्मंत्रत्रये॥यतएतेहीदंसर्वंकु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्वतीयादिपूर्वोक्तैःकात्यायिकादिभिर्योगिकैःशब्दैःसर्ववाक्येषुअग्निवायुसूर्याएवोच्यंते॥ततश्चवा
क्यांतरेषुविशेष्यभेदाभावात्प्रथमातिक्रमेकारणाभावादितिप्रथमवाक्येएवविशेष्यैःसाविशेषण
स्यसंबंधोपपत्तौवचनंविनासर्वत्रविशेषणावृत्तिरन्याय्यैकिंच॥अथातःपंचांगरुद्राणांन्यासपूर्व
स्यादेजपहोमार्चनविधिव्याख्यास्यामइत्यत्रहोमस्याप्युपक्रांतत्वात्तत्रचमंत्रविभागस्यावश्यमपेक्षितत्वा
च्चेत्तत्रचेत्सूत्रकारस्यानुषंगइष्टःस्यात्तदाअच्छिद्रोपेतिसर्वत्रेत्यादिवदेवानामितिसर्वत्रेत्यवक्ष्यत्सः॥
नचोक्ततयातत्तश्चनभवत्येव॥अतएवदेवयाज्ञिकैराद्यंचतुर्दशाक्षरंसामोदिव्यंदक्षंनमोवःकि
म्यदेकेभ्योदेवानांहृदयमेइत्येतदेकमेवयजुः॥अन्यानित्रीणिसप्ताक्षराण्यथव॥ततश्चआद्येनचतुर्द
शाक्षरमंत्रेणहोमः॥अन्यैस्त्रिभिःसप्ताक्षरैरेवेतिसिद्धं॥अतएवगंगादेवनरुद्रपद्धतौप्रतिमंत्रविभाग
पक्षव्याहृतिचतुष्टयमितीमंपक्षंस्वीकृत्याप्यनुषंगोनोक्तः॥यस्तुमहार्णवकारेणानुषंगोलिखितः॥
सतुन्नेत्तिरीयशाखाविषयकः॥तत्रच्छाखोक्तानामेवमंत्राणांविभागस्यकृत्वात्॥तस्मात्तत्रनज्ञाय
तेवाचनिकोवायमनुषंगउत्तरशाखांतरीयपाठोवात्रमूलमिति॥कारणंतुतैर्नलिखितं॥न्यायतस्त्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्माकं कांक्षानिवृत्तिर्न भवत्येव॥ पूर्वोक्तप्रकारेणान्वयस्यात्रानवकाशत्वात्॥ अपि चानुषंगः कुत्र
भवतीत्यत्र वाक्यानि साकांक्षाणि भवंति॥ यथा अस्मादन्नाद्यादौ साकांक्षत्वेन वाक्यस्य क्रियास्मार
कत्वाभावं निर्भक्तइत्यनुषंगः॥ प्रकृते तु नतथा॥ सर्वाण्यपि वाक्यानि निराकांक्षाण्येव संति॥ नमस्का
रसंयोगात्॥ ननु व्याहृतिचतुष्टयपक्षे तु नैराकांक्ष्यं तिष्ठत्येव परं तु पंचव्याहृतिपक्षे नमःशब्दाभावात्
कथं निराकांक्षत्वं॥ उच्यते॥ होमे तावत्स्वाहाकारा ध्याहरणान्नैराकांक्षान्नमस्कारस्य प्रयोजनमेवनास्ति॥
जपाभिषेकयोस्तु मंत्रविभागस्यानपेक्षितत्वाद्यथापाठमेव प्रयोगः॥ अथातः पंचांगरुद्राणां न्यासपूर्वक
जपहोमार्चनविधिं व्याख्यास्यामइत्यत्रार्चनशब्दस्याभिषेकपरइतिमहार्णवादयः॥ यदि पूजनपरता
ऽभ्युपगम्यते तदाऽभिषेकादन्यत्र पूजनेनमःशब्दस्यानुषंगएव भवति॥ तस्माद्व्याहृतिचतुष्टयपक्षे
पि कार्तीयानामनुषंगो नभवतीत्यलं विस्तरेण॥ अस्मिन्पक्षे नमइषुक्रुच्योधनुष्कृद्भ्यश्चवोनमइत्यत्रनमः
शब्दस्यद्वयाद्यजुष्ट्वनेदान्न चपरिशिष्टसंख्याविरोधः॥ अत्रसर्वत्रमंत्रांतस्वाहाकारः कर्त्तव्यः॥ यथा
ॐ नमस्तेऽबाहुभ्यामुतेनमःस्वाहाइत्येवंप्रथमानुवाकेषोडशाहुतयो द्वाषैत्तरशातात्मकपक्षे॥ तत्रइ

देमेकरुद्रायनममेतित्यागाः॥१६॥ततश्छंनमोहिरण्यबाहवेसेनान्यदिशांचपतयेनमःस्वाहेति
द्वापेअंधसइत्येतस्मात्पाकृषड्विंशत्यधिकंशतमाहुतयः॥तत्रइदंहिरण्यबाहवेसेनान्येदिशांचप
तयेनममेतियथालिंगंतावंतस्त्यागाः॥ ९२९ ततोद्वापेअंधसस्यतइत्यादिसप्तानांइदमेकरुद्रायेतिस
प्तस्यागाः॥७॥ततअंसंख्यातासहस्राणीत्याद्यानांत्रयोदशानांइदंबहुभ्योरुद्रेभ्योनममेतित्रयोद
शत्यागाः॥१२॥षोढाविभागेतुइदमेकरुद्रायहिरण्यबाहवेसेनान्यदिशांचपतयइत्यादिसर्वंयथा
लिंगंचशब्दान्नमःशब्दांश्चयत्काममंत्रांतपर्यंतंसमुच्चार्यअनेकेभ्यश्चनममेतिप्रथमत्यागः॥एवंइदंत
क्षभ्यइत्यारण्यसुधन्वनेचनममेतिद्वितीयः॥ततइदंसुत्यायेसारथ्यभानिर्हतेभ्यइत्यंतंपूर्ववद्यथालिंगंस
मुच्चार्यएकरुद्रायबहुभ्योरुद्रेभ्यश्चनममेतितृतीयः॥अथवासर्वरुद्राणांसमूहंकृत्वाबहुवचनांतेनप्र
योगः॥अथसपादशतचतुष्टयात्मके॥प्रथममिदमेकरुद्रायेतिसप्तमतिस्त्यागः॥आद्यानुवाकषोडशार्च्च
एकरुद्रदेवत्यइत्युक्तत्वात्॥ततइदंहिरण्यबाहवेसेनान्ये॥इदंदिशांपतये॥इदंवृक्षेभ्योहरिकेशेभ्यः॥इदंप
शूनांपतये॥इदंशष्पिंजरायत्विषिमतेइत्यमुनाप्रकारेणइदमानिर्हतेभ्यइत्यंताःशतद्वयंपंचचत्वारिंशाद

सं४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वंत्यागाः॥ततइदमेकरुद्रायेयेकत्रिंशंत्यागः॥ततइदंबहुभ्योरुद्रेभ्यइयेकोनाशीतिसंख्यास्त्यागाः॥इत्य
वं ४२५॥ चतुर्थपक्षेतुप्रथमानुवाकेअंत्यानुवाकेचप्रथमपक्षोक्ताएवत्यागाः॥मध्यमानुवाकेषुयथालिंगंतृती
यपक्षोक्तवदित्यविशेषेणयथाहुतिसंख्यंत्यागाः॥अथवासर्वत्रएकवचनांतेषुइदंरुद्रायेतिबहुवचनांतेषु
इदंरुद्रेभ्यइयेवंत्यागाः॥अथवाइदंरुद्रायेयेकवचनांतेनैवसर्वत्र॥यद्यपिस्वत्वंत्यागोयजमाननैवकार्यस्त
थापिबहुकर्तृकेहोमेत्यागस्यविभिन्नकालत्वेनत्यागकालस्यज्ञातुमशक्यत्वाद्धोमोपक्रमएवयष्टव्यदव
ताःस्मृत्वायजनीयद्रव्यंचमनसिनिधायेदंयथादेवतमस्तुइतित्यागोयजमानेनैवकर्त्तव्यंइतिमहार्णवा
दयः॥अथाहुतिसंख्या॥सारुद्राध्यायस्यसर्वजपहोमेयस्मिन्यक्षेयावंतोविभागास्तस्मिन्यक्षेतावं
त्यवतिरुद्रैकादशिन्यांतावद्वाषष्ट्युत्तरशतात्मकेपक्षे॥१७८२ लघुरुद्रे १७६०२ महारुद्रे २१५६२२ अ
तिरुद्रे २३७१८४२ अथषोडशविभागे॥रुद्रैकादशिन्यां ६६ लघुरुद्रे ७२६ महारुद्रे ७९८६ अतिरुद्रे
८७८४६ अथसपादशतचेष्टयात्मकपक्षे रुद्र्यां ४६७५ लघुरुद्रे ५१४२५ महारुद्रे ५६५६७५ अतिरुद्रे
६२२२४२५ अशीत्युत्तरद्विशतविभागपक्षेरुद्र्यां ३०८० लघुरुद्रे ३३८८० महारुद्रे ३७२६८० अतिरुद्रे
३३८८०

॥६॥
॥विभाग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४०९८८० एकाशीसुत्तरशतद्वयात्मकेऋचां ३०९१ लघुरुद्रे ३४००१ महारुद्रे १७४०११ अति
रुद्रे११४१२१ इतिनमकमंत्रविभागपक्षाज्जाहुतिसंख्याच॥यज्ज्ञाग्रतेत्यादिहृदयाद्यंगैस्तुषडंगन्यास
एव कार्यनिपुनस्तेषांजपाद्यर्थमावृत्तिरितिशांतिरत्नप्रभृतिनिबंधकारमतं॥गंगदेवपरशुमारौदिप
द्धतिकारमतंतुजपाद्यर्थमंगानापुनरावृत्तिर्नवक्तव्येव॥सांगमाद्यंजपेद्वुद्रंकेवलानिनवैवतु॥सांगंसशी
र्षचांत्येनिरंगमितिकेचनेतिवचनात्॥ततश्चैतन्मंत्रविभागस्यावश्यमपेक्षितत्वाद्धोमार्थंसउच्च्य
ते॥यज्ज्ञाग्रतइत्येकाऋगेवतावन्मंत्रयज्ज्ञाग्रतइत्याद्याःषट्कंडिकाऋचएव॥ततश्चैतावंतो
मंत्राः॥६॥षण्णामिदंमनसेनमःइतित्यागः॥सहस्रशीर्षाज्यैःसंपृतइत्येतौद्वावनुवाकेविंशति
रंडात्मकावृक्रूपोवेदतावन्मंत्राइति॥२२॥सहस्रशीर्षापुरुषइत्ययंद्वाविंशतिकंडिकात्मकः
सपूर्णाध्यायोऋगूपएव॥अत्रद्वाविंशतिर्ऋचस्तावंतोमंत्राः॥२२॥द्वाविंशतिसंख्याकानांमध्ये
आद्यानांषोलशानामिदंपुरुषायजगद्बीजायनमइतित्यागः॥ततःषण्णामिदमादित्यायेतित्यागः॥
आशुविज्ञानइत्यस्मिन्ननुवाकेसप्तदशकंडिकाःसप्तदशर्चः॥ततःश्चैतावंतोमंत्राः॥१७॥तत्राद्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नां द्वादशानामिंद्रायेतिस्वाहागः॥अवस्फूर्जाइत्यस्याइदमिंद्रायवृत्रघ्नेमममेतिस्वाहागः॥प्रेताजयताइत्यस्याइदंयोद्ध्र्यइतिस्वाहागः॥यत्रबाणाइत्यस्याइदमिंद्रायबृहस्पतयेऽदित्यैचेतिस्वाहागः॥ममाग्नेवर्चइत्यस्याइदंसोमायवरुणायादेवन्यश्चेतिस्वाहागः॥विघ्नाद्रिसंज्ञास्मिन्ननुवाकेचतुर्दशाकंडिकाश्चतुर्दशर्चः॥तिस्रश्चप्रतीकोक्ताः॥ पञ्चसप्तदशामंत्राः॥अत्रसप्तदशानामपिइदंसूर्यायेतिस्वाहागः॥तंप्रत्यध्यसादिवंसुद्रंसइत्यंतायमंत्रः॥अयंवेनइत्यत्रर्हिंस्यतंस्यातेस्वाहाकारः॥वयंसोमव्रतेत्यस्मिन्ननुवाकेअष्टौकंडिकास्तत्रवयंसोमेतिऋक्॥एषतेद्वेयजुषी॥अवक्रंदेनषजमित्येतद्द्वेऋचौ॥त्र्यंबकमितिद्वेऋचौ॥एतेनरुद्रंयपस्यतेएतत्तेत्वायुषामित्येतद्द्वेऋचौ॥शिवानामासिनिवर्त्तयामीत्येतद्द्वेयजुषी॥एवमेकादशामंत्राएते॥अत्रवयंसोमव्रतेस्याइदंसोमायेतिअन्यषोडशानामिदंरुद्रायेतिस्वाहागः॥अत्रैवंपंचस्वपिरुद्रेषुगणोयाअंगप्रधानहोमसंख्यानुसारेणकुंडंकार्यं॥वस्तुतस्तुअंगहोमंविनाप्रधानभूतनशतरुद्रियेणैवहोमोभवतीतिमहाणवादिमतमेवसमीचीनं॥अंगहोमप्रमाणानावात्॥यत्तुसांगमाद्यंजपेदुद्रमितिक्वचनंतत्तुजपात्मकरुद्रअंगानांजपःकर्त्तव्यइत्येवंपरं॥जपेदितिजपश्राब्दात्॥अतश्चहोमाभिवेकात्मकरुद्रन्यासार्थमेवांग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पाठेनपुनर्जपवद्धोमाभिषेकार्थं॥अतएवगंगादेवादिभिःस्वस्वग्रंथेअंगमंत्रविभागोनलिखितः॥
महार्नवादिमतेजपरुद्रपिन्यासार्थमेवांगपाठइत्युक्तमेव॥एतेसर्वेमंत्रविभागपक्षहोमात्मकरुद्रएव
ज्ञेयाः॥नजपाभिषेकात्मके॥अभिषेकेतावद्धोमावत्त्रयोजनमेवनास्तिमंत्रविभागस्य॥जपात्मके
तुहोमस्यविद्यमानत्वेपिनप्रयोजनं॥यतस्तत्रनमःशंभवायेत्यनेनैवहामःकर्तव्यइतिविधानमस्ति॥
नच्च॥ततोहोमंप्रकुर्वीतनमःशांभवितिमंत्रतः॥रुद्रैकाशिनीजाप्यत्रयस्त्रिंशत्तथाहुतीरितिबोधाय
नं॥तथाचरुद्रपराशरः॥अक्षतान्वातिलान्चापियवान्वासमिधोपिवा॥शंभवायेतिजुहुयात्सर्वा
स्तानाज्यसिक्तकानिति॥तथाचपरिशिष्टेकात्यायनः॥शंवायेतितिलाज्यसमिधोहुत्वेति॥एवं
चिजपदशांशहोमोप्यत्रनभवतीतिकमलाकरभट्टाआहुःशांतिरत्ने॥अतएवसमंविभागःयोग
म्यूलाभावाच्चहेमाद्युक्तोवाचनिकनमःशंभवेचेतिमूलमंत्रेणहोमोनतुदशांशेनेतिवयमिति॥
ततश्चजपदशांशेनहोमोभावाद्धोमदशांशेनतर्पणंतद्दशांशेनमार्जनंचेत्यपिनभवत्यत्र॥तस्यपुर
श्चरणधर्मत्वात्॥पुरश्चरणार्थंक्रियमाणेतुरुद्रेतत्सर्वंभवत्येव॥तथाचरुद्रपराशरःअक्षतान्वाति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्नात्वा पिबेत्वान्वा समिधो पिवा॥ रौं नमो वाचे ति जुहुयात्सर्वांस्तान्याज्यसिक्तकान्॥ पंचपंचाथषट्
षट्वा अष्टावष्टौदशापिवा॥ दशादशैकादशादजुहुयात्साधिकोद्विजः॥ जपतर्पणाहोमादौरतोयो
वत्सरंजपेदिति॥ आदिशब्दात्तर्पणदशांशेनमार्जनंतदशांशेनब्राह्मणभोजनंचवेदितव्यं॥ महार्ण
वोक्तौ धाषोडशाधाष्टाचत्वारिंशद्विभागपक्षाअस्माकंवाजसनयिनोनमंतु॥ तेषांपरशवोक्त्वा
स्वशाखोक्तपक्षविरोधाच्च॥ एवंचसतित्रि धापक्षस्यपरशुरामकल्पेनंअष्टाचत्वारिंशद्विद्विभागप
क्षस्यकाशीदीक्षितकल्पेनंचायुक्तमेव॥ किंचकाशीदीक्षितोक्तेऽस्मिन्पक्षेऽष्टावनुवाकाऽष्टौयज्ञेषीतिका
रूस्तिवचनप्रमाणविरोधोपि॥ तद्यथा॥ आद्येऽनुवाकेषोडशमंत्राः॥ ततोहिरण्यबाहवइत्यादीनांयजु
षांसप्तानुवाकाःसप्तमंत्राः॥ यजुषामष्टमानुवाकस्यास्माकमभावान्नाशो॥ तैत्तिरीयाणांतुनमकमंत्रा
णामेकादशानुवाकाःसंतिततश्चतेषामष्टमानुवाकस्यसद्भावात्॥ संभवत्ययंपक्षः॥ अस्माकंतुनवैवानु
वाकाःसर्वे॥ तत्रप्रथमायोद्वावनुवाकौतावदृचामेव॥ ततश्चयावत्योऽत्रऋचस्तावंतोमंत्राः॥ यजुषां
मध्येमानुवाकास्तुसप्तैव॥ ततश्चतावंतोमंत्रास्ते॥ अंत्यानुवाकेसप्तदशाऋचःसप्तमंत्राः॥ ततो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यानि त्रीणि यजूंषीति त्रयः॥ सर्वमिलिता स्त्रिचत्वारिंशदेव॥ एवंच सति दीक्षितैर्यदुक्तं पंचव्याहृतिभिः सहैते अष्टाचत्वारिंशन्मंत्रा इति तदसत्॥ व्याहृतीनां सप्तानुवाकांतर्गतत्वात्॥ अष्टावनुवाका अष्टौ यजूंषीति काशकृत्स्निवचनमयांतरमहावाक्याभिप्रायेणोक्तिमहार्णवः॥ केचित्सकलब्राह्मण्यायस्यैकमंत्रत्वमेवेच्छंति॥ तत्रमूलमृग्यम्॥ तत्यक्षेतुकरएवमंत्रविभागः॥ १॥
इतिश्रीदीक्षितकामदवकृतानेकमंत्रविभागप्रदीपः॥ त्र्यंबकंयायतोऽन्नलिखा पयित्वा॥
सांगमाद्यंजपेदुदंदेवलानि मनेवैवतु॥ सांगंसशिखंकृत्वांतेनिरंगमितिकेचन॥ १॥ ४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमस्ते रुद्राध्यायभाष्यम् श्वाराकार.

मंत्रविभाग प्रदर्शिकम्

कामदेवदीक्षितभाष्यम्

वा नाडी धामनाकस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=23.09.19 13:52
,TRANSFERRED=2019/09/23 at 13:56:12
,PAGES=21
,TYPE=STD
,NAME=S0001897
,Book Name=M-2163-RUDRADHYAMATMAY
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection